CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 575

Title Tattva viveka

CHUNILAL GANDHI VIDYABHAVAN, SURAT
Shastri Dinmanishankar Pustak-Bhandara
No.: 575 Subject: Vedanta.
Title: Tattva viveka-
Author: Vidyāraṇya Scribe: —
Date of the work: — Date of the Ms.: —
Place of the work: — Place of the Ms.: —
Size: 11.5" by 4.8" Extent: 25 foll.
Language: Sanskrit Script: Devanāgarī
Remarks: —

विवेक

॥श्रीगणेशायनमः॥ ॥नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ प्रत्यक्त्वविवेकस्यक्रियतेपददीपिका॥१॥
प्रारिप्सितग्रंथस्याविघ्नेनपरिसमाप्तिप्रचयगमनाभ्यांशिष्टाचारपरिप्राप्तमिष्टदेवतागुरुनमस्कारल
क्षणंमंगलाचरणंस्वेनानुष्ठितंशिष्यशिक्षार्थंश्लोकेनोपनिबध्नाति॥अर्थाद्विषयप्रयोजनेचसूचयति

॥श्री ॥नमःश्रीशंकरानंदगुरुपादांबुजन्मने॥

नमइति॥शंसुखंकरोतीतिशंकरःसकलजगदानंदकरःपरमात्माएषह्येवानंदयतीतिश्रुतेःआनंदःनि
रतिशयप्रेमास्पदत्वेनपरमानंदरूपःप्रत्यगात्माशंकरश्चासावानंदश्चेतिशंकरानंदःप्रत्यगभिन्नःप
रमात्मासएवगुरुःपरिक्लृप्तलायेतानुत्सादनहेतुशक्तिपातेनयोजयतिपरेतत्वेसहीक्षयाचार्यमूर्त्ति

स्वइत्यागमात्॥श्रीमांश्चासौशंकरानंदगुरुश्चेतिगंधद्विपइत्यादिवत्समासः॥अनेनश्रीगुरोरणिमाद्यैश्वर्य
संपन्नत्वंसूचितं॥यद्वाश्रियाभूत्याशंकरोतीतिश्रीशंकरःएतेर्दातुःपरायणमितिश्रुतेःअनेनश्रीगुरो
र्भक्तेष्टसंपादनेसामर्थ्यंसूचितंभवति॥अस्यगुरोःपदावेवांबुजन्मकमलंतस्मैनमःप्रह्वीभावोस्तु॥किं

सविलासमहामोहग्राहग्रासैककर्म्मणे॥ ॥१॥ ॥

विधायसविलासमहामोहग्रासैककर्म्मणेविलासःकार्यवर्गःतेनसहवर्त्ततइतिसविलासःमहामोहोमू
लाज्ञानंसएवग्राहःमकरादिवत्स्ववशंप्राप्तस्यातीवदुःखहेतुत्वात्तस्यग्रासोग्रसनंनिवर्त्तनंसएवैकंमुख्यं
कर्म्मव्यापारोयस्यतत्तथातस्माइत्यर्थः॥अत्रचशंकरानंदपदद्वयसामानाधिकरण्येनजीवब्रह्मणोरेकत्व
लक्षणोविषयः॥जीवस्यभ्रमब्रह्मतयाऽपरिछिन्नसुखाविर्भावलक्षणंप्रयोजनंचसूचितंसविलासेत्या

दिनानिःशेषानर्थानिहत्त्विलक्षणेपयोजनंसुखलाभादिति॥इदानीमवांतरप्रयोजनकथनपुरःसरंग्रं
थारंभंप्रतिजानीते॥तस्मादित्यादि॥तस्मगुरोःपादावेवाबुरुहंकमलंतयोर्हंतस्मसेवयापरिचर्ययास्तनि॰
मस्कारादिलक्षणयानिर्मलंरागादिरहितंचेतोतःकरणंयेषांतेतथोक्तास्तेषांसुखबोधायानायासे
नतत्त्वज्ञानोत्पादनायायंवक्ष्यमाणप्रकारस्यतत्त्वस्यानोपिनस्यश्रवंइत्यत्रिदानेंहंमहावाक्येनलक्ष

तस्मादंबुरुहदंहसेवानिर्मलचेतसां॥सुखबोधायतत्त्वस्यविवेकोयंविधीयते॥२॥

तइतिवक्ष्यमाणस्यविवेकश्चारोपितात्यंचकोशादिलक्षणाज्जगतोविवेचनंविधीयतेक्रियतेइत्यर्थः जीव
ब्रह्मणोरेकत्वलक्षणविषयसंभावनायजीवस्यतत्पदाभिधेयस्यब्रह्मणश्चत्वंपदार्थयोरैक्यंसंभवतीति
पादनेननित्यत्वंसाधयतिशइत्यस्यार्थादयइत्यादिना॥तत्रजीवस्यहव्यवहारवतिजागरेज्ञानस्यासंदं २

साधयतिशइतिजागरेइंद्रियैरर्थोपजब्धिर्जागरितमितिलक्षणं वस्तुविशेषवेद्याःसंविदिषयभूताः
शइत्यस्यार्थादयश्चाकाशादिगुणत्वेनशमिश्रास्तदाधारत्वेनचमिश्राश्चाकाशादयश्चवैचित्र्यात्परस्परंगवा
श्वादिवद्वैलक्षण्येपेनत्वात्यंकपरस्परंभिद्यंतेनतस्तेभ्योविभक्तायुष्मद्विवेचितानंवित्रेषांशइदं

शइत्यस्यार्थादयोवेद्यावैचित्र्याज्जागरेएयकाः॥ततोविभक्तानंविदैकरूप्यान्नभिद्यते॥३॥

तोसंविज्ञानंएकरूप्यासंविसंविदितिएकाकारेणावभासमानत्वात्॥जगनमिवनभिद्यते॥अत्रायंप्रयोग
विवादाध्यासितासंवित्स्वाभाविकभेदश्रुन्याउपाधिपरामर्शमंतरेणाविभाव्यमानभेदत्वात्॥गगन
वत्॥शइतसंवित्स्पर्शसंविदोनभिद्यतेसंवित्त्वास्पर्शसंविद्वदितिएकस्यासंवियोगगनस्येवोपाधिकभेदे

दिनानिःशेषानर्थनिवृत्तिलक्षणं प्रयोजनं सुखतएवाभिहितं॥ इदानीमवांतरप्रयोजनकथनपुरःसरं ग्रं
थारंभं प्रतिजानीते॥ तत्पादेति॥ तस्य गुरोः पादावेवाबुरुहे कमले तयोर्द्वंद्वं तस्य सेवया परिचर्ययास्तुतिः
नमस्कारादिलक्षणया निर्मलं रागादिरहितं चेतोतःकरणं येषां ते तथोक्तास्तेषां सुखबोधायानायासे
न तत्वज्ञानोत्पादनायायं वक्ष्यमाणप्रकारस्य तत्वस्यानोपितस्य अखंडं सच्चिदानंदं महावाक्येन लक्ष

तत्पादांबुरुहद्वंद्वसेवानिर्मलचेतसां॥ सुखबोधाय तत्वस्य विवेकोयं विधीयते॥२॥

त इति वक्ष्यमाणस्य विवेक आरोपितात्पंचकोशादिलक्षणाज्जगतो विवेचनं विधीयते क्रियते इत्यर्थः जीव
ब्रह्मणोरेकत्वलक्षणविषयसंभावनाय जीवस्य सत्यज्ञानादिरूपतां दिदर्शयिषुरादौ ज्ञानस्याभेदप्रति
पादनेन नित्यत्वं साधयति शब्दस्पर्शादय इत्यादिना॥ तत्र तावद्विस्पष्टव्यवहारवति जागरे ज्ञानस्याभेदं २

साधयति॥ शब्देति॥ जागरे इंद्रियैरर्थोपलब्धिर्जागरितमित्युक्तलक्षणं वस्थाविशेषे वेद्याः संविद्विषयभूताः
शब्दस्पर्शादय आकाशादिगुणत्वेन प्रसिद्धास्तदाधारत्वेन प्रसिद्धा आकाशादयश्च वैचित्र्यात्परस्परं गवा
श्वादिवद्वैलक्षण्योपेतत्वात्पृथक्परस्परं भिद्यंते ततस्तेभ्यो विभक्ता बुद्ध्या विवेचिता तत्संवित्तेषां शब्दादी

शब्दस्पर्शादयो वेद्या वैचित्र्याज्जागरे पृथक्॥ ततो विभक्ता तत्संविदैकरूप्यान्न भिद्यते॥३॥

नां संविज्ज्ञानं एकरूप्यात्संवित्संविदिति एकाकारेणावभासमानत्वात्॥ गगनमिव न भिद्यते॥ अत्रायं प्रयोगः
विवादाध्यासिता संवित्स्वाभाविकभेदशून्या उपाधिपरामर्शमंतरेणाविभाव्यमानभेदत्वात्॥ गगन
वत्॥ शब्दसंवित्स्पर्शसंविदो न भिद्यते संवित्त्वात्स्पर्शसंविद्वदिति॥ एकस्यासंवियोगगनस्येवोपाधिकभेदे

नापिभिन्नव्यवहारोपपत्तौवास्तवभेदकल्पनायांगौरवंबाधकमुन्नेयम्॥३॥उक्तन्यायेंस्वप्नेप्यतिदिशति॥तथे
ति यथाजागरणेवैचित्र्याद्विषयाणांभेदएकरूप्यात्संविदोऽभेदश्चतथातेनैवप्रकारेणस्वप्नेकरणेषूपसंहृ
तेषुजागरितसंस्कारजःप्रत्ययःसविषयःस्वप्नइत्युक्तलक्षणायांस्वप्नावस्थायामपिविषयाएवभिन्नाःनसं

तथास्वप्नेत्रवेद्यंतुनस्थिरंजागरेस्थिरं॥तद्भेदोतस्तयोःसंवित्एकरूपानभिद्यते॥४॥ ब

विदिति॥ननुयदिस्वप्नजागरयोरेकाकारताविषयतत्संविदोर्भेदाभेदाभ्यांतर्हिस्वप्नोजागरइतिभेदव्यवहारः
किंनिमित्तकइत्याशंक्याह॥अत्रवेद्यंत्विति॥अत्रस्वप्नेवेद्यंपरिदृश्यमानंवस्तुजातंनस्थिरंनस्थायिप्रतीतिमात्र
शरीरत्वाज्जागरेतुपरिदृश्यमानंवस्तुजातंस्थिरंस्थायिकालांतरेपिद्रष्टुंयोग्यत्वादतःस्थिरास्थिरविषयत्व
लक्षणवैलक्षण्यात्तद्भेदस्तयोःस्वप्नजागरयोर्भेदइत्यर्थः॥ननुस्वप्नजागरयोर्भेदश्चेत्तत्संविदोरपिभेदस्यादि ३

त्याशंक्याह॥तयोरिति॥एकरूपेतिहेतुगर्भंविशेषणं॥४॥ ॥एवमवस्थाद्वयेज्ञानस्यैकत्वंप्रसाध्यसुषुप्तिकाली
नस्यापितस्यतेनैक्यप्रसाधनायतत्रतावत्ज्ञानंसाधयति॥सुप्तेति॥सुप्तउत्थितःसुप्तोत्थितःसुप्तंसुषुप्ति
तस्मादुत्थितइतिवातस्यसौषुप्ततमोबोधःसुषुप्तिकालीनस्यतमसोऽज्ञानस्ययोबोधोज्ञानमस्तिनकिंचि
देवेदिषमितिसास्मृतिरेवभवेन्नानुभवस्तत्कारणस्येंद्रियसंनिकर्षव्याप्तिलिंगादेरभावादितिभावः॥तत

सुप्तोत्थितस्यसौषुप्ततमोबोधोभवेत्स्मृतिः॥साचावबुद्धविषयाऽवबुद्धंतत्तदातमः॥५॥

किंतत्राह॥साचेति॥साचस्मृतिरवबुद्धविषयाऽवबुद्धोऽनुभूतोविषयोयस्याःसातथोक्तायास्मृतिःसानुभवपूर्व
केतिव्याप्तिर्लोकेदृष्टेतिभावः॥ततोपिकिंतत्राह॥अवबुद्धमिति॥ततस्तस्मात्कारणात्तत्सौषुप्तंतमःतदासु
प्तौअवबुद्धंअनुभूतमित्यवगंतव्यं॥अत्रायंप्रयोगःविमतंनकिंचिदवेदिषमितिज्ञानंअनुभवपूर्वकंभवि

तुमर्हतिस्मृतित्वात्सामेमातेतिवदिति॥५॥तस्यानुभवस्यविषयादज्ञानाद्भेदंबोधांतराभेदंचाहसबोधइति
सबोधःसौषुप्ताज्ञानानुभवःविषयादज्ञानाद्भिन्नःपृथक्भवितुमर्हति॥बोधत्वात्घटबोधवत्॥बोधांतरात्र
भिद्यतेबोधत्वात्स्वप्नबोधवत्॥फलितंकथयन्नुक्तन्यायमन्यत्राप्यतिदिशतिएवमित्यादिना॥स्थानत्रयेपिए

सबोधोविषयाद्भिन्नोनबोधात्स्वप्नबोधवत्॥एवंस्थानत्रयेप्येकासंवित्तद्वद्दिनांतरे॥६॥

कदिनवर्त्तिजाग्रदाद्यवस्थात्रयेपिसंविदेकैवसर्वंवाक्यंसावधारणमितिन्यायात्तद्वद्दिनांतरइति॥६॥यथै
कस्मिन्दिवसेऽवस्थात्रयेपिज्ञानस्याभेदएवमन्यस्मिन्नपिदिवसेऽनेकधाऽनेकप्रकारेणगतागम्येष्वतीता
गामिषुमासेषुचैत्रादिषुअब्देषुप्रभावादिषुयुगेषुकृतादिषुकल्पेषुब्रह्मादिषुचज्ञानस्याभेदएवेत्यर्थः
संविदएकत्वसमर्थनेफलमाह॥नोदेतीति॥यतःसंविदेकाऽतोनोदेतिनोत्पद्यतेनास्तमेतिनविनश्य ४

तिचअसाक्षिकयोरुत्पत्तिविनाशयोरसिद्धेःस्वोत्पत्तिविनाशयोस्तयैवसंविदाग्रहीतुमशक्यत्वात्संविदंत
राभावाच्चेतिभावः॥ननुसंविदंतराभावेग्राहकाभावादस्याप्यभानेजगदांध्यंप्रसज्येतेतिअतआह॥एषेति
अत्रायंप्रयोगःसंवित्स्वयंप्रकाशाअवेद्यत्वेसत्यपरोक्षत्वात्व्यतिरेकेघटवत्नचायंविशेषणासिद्धोहेतुः
संविदःस्वसंवेद्यत्वेकर्मकर्तृत्वविरोधात्परवेद्यत्वेऽनवस्थानादतःस्वप्रकाशत्वेनभासमानायाःसंविदःस

मा

मासाब्दयुगकल्पेषुगतागम्येष्वनेकधा॥नोदेतिनास्तमेत्येकासंवित्एषास्वयंप्रभा॥७॥

र्वावभासकत्वसंभवात्रजगदांध्यप्रसंगइतिभावः॥७॥भवत्येवंसंविदोनित्यत्वंस्वप्रकाशत्वंचततःकिमित्य
तआह॥इयमिति॥अत्रायंप्रयोगःयासंविदात्माभवितुमर्हतिनित्यत्वेसतिस्वप्रकाशत्वात्यन्नैवंनतदेवंय
थाघटइतिआत्मनोनित्यसंविद्रूपत्वप्रसाधनेनसत्यत्वमपिसाधितंभवतिनित्यत्वातिरिक्तसत्यत्वाभावात्

नित्यत्वं सत्यत्वं तद्यस्यास्ति तन्नित्यं सत्यमिति वाचस्पतिमिश्रैरुक्तत्वादिति भावः॥ आत्मन आनंदरूपत्वं साधय
ति॥ परानंद इति आत्मेत्यनुषज्यते परश्चासावानंदश्च परानंदः निरतिशयसुखस्वरूप इत्यर्थः तत्र हेतुमाह
परेति॥ यतो यस्मात्कारणात् परस्य निरुपाधिकत्वेन निरतिशयस्य प्रेम्णाः स्नेहस्य आस्पदं विषयस्तस्मादत्रे

इयमात्मा परानंदः परप्रेमास्पदं यतः॥ मा न भूवं हि भूयासमिति प्रेमात्मनीक्ष्यते ॥८॥

दमनुमानमात्मा परमानंदरूपः परप्रेमास्पदत्वाद्यः परमानंदरूपो न भवति नासौ परप्रेमास्पदमपि यथाघ
टो न तथा चायं परप्रेमास्पदं न भवति न तस्मात्परानंदरूपो न भवतीति॥ नन्वात्मनि धिङ्मामिति द्वेषस्योपल
भ्यमानत्वात्प्रेमास्पदत्वमेवासिद्धं कुतः परप्रेमास्पदत्वमित्याशंक्य तस्य दुःखसंबंधनिमित्तकत्वेनान्यथासि ५

द्धत्वात्प्रेम्णश्चात्मन्यनुभवसिद्धत्वान्नैवमिति परिहरति॥ मा न भूवमिति॥ हि यस्मात्कारणादात्मनि विषये मा न
भूवमहं मा भूवमिति न ममासत्वं कदापि मा भूत्किंतु भूयासमेव सदासत्वमेव मम भूयादित्येवंविधप्रेमेक्ष्यते
सर्वैरनुभूयतेऽतो नासिद्धिरित्यर्थः॥८॥ मा भूत्स्वरूपासिद्धिः प्रेम्णः परत्वे मानाभावाद्विशेषणासिद्धिर्हेतोरि
त्याशंक्याह॥ तत्प्रेमेति॥ ॥ अन्यत्र स्वातिरिक्तपुत्रादौ यत्प्रेम तदात्मार्थं तेषामात्मशेषनिमित्तकमेव न स्वाभा

तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनि॥ अतस्तत्परमं तेन परमानंदतात्मनः॥९॥ ब

विकमेवमात्मनि विद्यमानं प्रेमान्यार्थं नात्मनोऽन्यशेषत्वनिमित्तकं न भवति किंत्वात्मत्वनिमित्तकमेवातो निरुपा
धिकत्वात्तत्परमं निरतिशयं॥ फलितमाह तेनेति तेन निरतिशयप्रेमास्पदत्वेनात्मनः परमानंदता निरतिशय
सुखरूपत्वं सिद्धं॥९॥ एतैः सप्तभिः श्लोकैः प्रतिपादितमर्थं संक्षिप्य दर्शयति॥ ॥इत्थमिति॥ ॥शब्दस्पर्शाद

यइत्यादिनाज्ञानस्यनित्यत्वेप्रसाध्यतस्यैवेयमात्मेत्यात्मत्वप्रसाधनेनात्मनःसच्चिद्रूपत्वंसाधितंपरानंदरू
त्यादिनाचपरानंदरूपत्वंसमर्थितमतआत्मासद्वाक्येवंपदार्थःसच्चिदानंदरूपःसिद्ध॥ननुकर्तृत्वभो
क्तृत्वात्मनोयुक्त्यैवावगतावुपनिषदोनिर्विषयत्वेनाघात्मापप्रसंगइत्याशंक्याहतथाविधमिति तथानाह॰

इत्येसच्चित्परानंदआत्मायुक्तातथाविधं॥परंब्रह्मतयोरैक्यंअसंतेषूपदिश्यते॥१०॥

त्विधाचकारोयस्मात्तत्तथाविधंसच्चिदानंदरूपंपरंब्रह्मतत्पदार्थस्तयोस्त्वंपदार्थयोरैक्यमखंडैकरस
त्वेचअसंतेषुवेदांतेषुउपदिश्यतेऽतोनवेदांतानांनिर्विषयत्वमित्यर्थः॥१०॥ आत्मनःप
रमानंदरूपत्वमाक्षिपति॥ ॥अमानइति॥परमानंदरूपत्वेनभासतेवाअभानेऽअप्रतीतौनपरंवेत्मात्मनि ६

निरतिशयस्नेहोनस्यादिषयसौंदर्यमानजन्यत्वात्तेहमानेचतीतौतुविषयेसुखसाधनेस्वर्गादौनज्ञानेसु
खेवास्यादारद्यज्ञानस्यात्कृत्नज्ञानौसत्यांसाधनेच्छानुपपत्तेःनित्यनिरतिशयानंदज्ञानेसतिक्षणिकेसाधनपा
रतंत्र्यादिदोषदूषितेवैषयिकेसुखेस्पृहायोगाच्चतस्मान्नानंदरूपतात्मनउपपन्नेतिचकारोतरस्मात्समभा

अमानेनपरंवेममानेनविषयेस्पृहा॥अतोमानेप्यमातासौपरमानंदतात्मन॥११॥

वान्मैवमितिपरिहरति॥अनइतिमतोमानाभानपक्षयोरुभयोरपिदोषात्मतःकारणात्मनोऽसौपरमानं
दतामानेपिसतीतौसत्यामपिअमातानसतीतामवति॥११॥ननुवेकस्मपुंगपक्षेनाभानेनपुंस्त्वेऽस्माशंक्यकि
मिदमपुंस्त्वंअहंस्वरत्वमुपपत्तिरहितंवानाघइत्याह॥अथेत्यवर्गेति॥अथेवृणांवेदपाठकानांवर्गःसमूहस्त
समथेतिश्रुतौत्यथेत्यवर्गमधस्तःसचासौपुंस्त्वेतिनपानस्याध्ययनंनकर्हिकपंनेतस्यशशोश्वनिर्यथा॰

वहिष्टस्यपितुर्भासमानोपिसामान्यतोनभासतेविशेषतोयंमत्पुत्रध्वनिरितितथानंदस्यापिभानेप्यभानंभव
तीत्यर्थः॥ ॥द्वितीयंप्रत्याह॥भानस्येति॥भानेप्यभानमित्येतदत्राप्यनुषंजनीयंभानस्यस्फुरणस्यप्रतिबंधेन
वक्ष्यमाणलक्षणेनभानेप्यभानंसामान्यतःप्रतीतावपिविशेषाकारेणाप्रतीतिर्युज्यतेउपपद्यतइत्यर्थः॥१२॥

अध्येतृवर्गमध्यस्थपुत्राध्ययनशब्दवत्॥भानेप्यभानंभानस्यप्रतिबंधेनयुज्यते॥१२॥प्रतिबंधो
स्तिभातीतिर्व्यवहारार्हवस्तुनि॥तंनिरस्यविरुद्धस्यतस्योत्पादनमुच्यते १३॥ ७ ॥ ॥

कोसौप्रतिबंधइत्यतआह॥प्रतिबंधइति॥अस्तिभातीतिव्यवहारार्हवस्तुनिअस्तिविद्यतेभातिप्रकाशतइत्ये
वंप्रकारंव्यवहारमर्हतीत्यस्तिभातीतिव्यवहाराहंतद्वस्तुचेतितथातस्मिन्पूर्वोक्तंव्यवहारंनिरस्यनिराकृत्य
विरुद्धस्यनास्तिनभातिइत्येवंरूपस्यतस्यव्यवहारस्योत्पादनंजननंप्रतिबंधउच्यते॥१३॥उक्तलक्षणस्यप्र

तिबंधस्यकारणंदृष्टांतदार्ष्टांतिकयोःक्रमेणदर्शयति॥तस्येति॥पुत्रध्वनिश्रुतौपुत्रध्वनिश्रवणलक्षणेदृष्टांतेतस्य
प्रतिबंधस्यहेतुःकारणंसमानाभिहारःबहुभिःसहपठनंइहादार्ष्टांतिकेव्यामोहैकनिबंधनंव्यामोहानांविप
रीतज्ञानानामेकनिबंधनंमुख्यंकारणंअनादिरुत्पत्तिरहिताऽविद्यावक्ष्यमाणाप्रतिबंधहेतुरित्यर्थः॥१४॥

तस्यहेतुःसमानाभिहारःपुत्रध्वनिश्रुतौ॥इहानादिरविद्यैवव्यामोहैकनिबंधनं॥१४॥चिदानं
दमयब्रह्मप्रतिबिंबसमन्विता॥तमोरजःसत्वगुणाप्रकृतिर्द्विविधाचसा॥१५॥ ७ ॥ ॥

दानींप्रतिबंधहेतुमविद्यांप्रतिपादयितुंतन्मूलभूतांप्रकृतिंव्युत्पादयति॥चिदानंदेति यश्चिदानंदरूपंब्र
ह्मतस्यप्रतिबिंबेनछाययासमन्वितायुक्तातमोरजःसत्वगुणासत्वरजस्तमोगुणानांसाम्यावस्थाया
साप्रकृतिरित्युच्यतेसाचद्विविधाद्विप्रकाराभवतिचकाराद्वक्ष्यमाणंप्रकारांतरंसूचयति॥१५॥ ७ ॥

सहेतुकं द्वैविध्यमेव दर्शयति॥ सत्वेति॥ सत्वस्य प्रकाशात्मकस्य गुणस्य शुद्धिः गुणांतरेण कलुषीकृतता अवि
शुद्धिः गुणांतरेण कलुषीकृतत्वं ताभ्यां सत्वशुद्ध्यविशुद्धिभ्यां ते च द्विविधे मायाविद्ये मायेत्यविद्येति च मते सं॰

सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते॥ मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः॥१६॥
अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा॥ ७॥

मते विशुद्धसत्वप्रधाना मायामलिनसत्वप्रधाना विद्ये
त्यर्थः यदर्थं मायाविद्ययोर्भेद उक्तस्तदिदानीं दर्शयति॥ मायाबिंब इति मायाबिंबो मायां प्रतिफलितश्चिदात्मा
तां मायां वशीकृत्य स्वाधीनीकृत्य वर्त्तमानः सर्वज्ञः सर्वज्ञत्वादिगुणः ईश्वरः स्यादविद्यावशगोऽविद्यायां प्रतिबिं
बत्वेन तत्परतंत्रस्तु चिदात्मान्यो जीवः॥ ७॥

स्यात्स च तद्वैचित्र्यात् तस्या अविद्याया उपाधिभूताया वैचित्र्यादविशुद्धितारतम्यादनेकधा अनेकप्र
कारः देवतिर्यगादिनेदेन विविधो भवतीत्यर्थः॥ यथा मुंजादिष्वीकैवमात्मा युक्त्या समुद्धृतः॥ शरीरत्रि
तयाद्वीरैः परं ब्रह्मैव जायत इत्युत्तरत्र शरीरत्रितयाद्विवेचितस्य जीवस्य परब्रह्मत्वं वक्ष्यति तत्र तानि
कानि त्रीणि शरीराणि तदुपाधिको वा जीवः किंरूपो भवतीत्याकांक्षायां तत्सर्वं क्रमेण व्युत्पादयति॥

साकारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवान्॥१७॥ तमःप्रधानप्रकृतेस्तद्भोगायेश्वराज्ञया॥

साकारणशरीरमित्यादिना॥ अविद्याकारणशरीरं स्थूलसूक्ष्मशरीरादिकारणभूतप्रकृत्यवस्थाविशे
षत्वात्कारणमुपचाराच्छीर्यते तत्वज्ञानाद्विनश्यति चेति शरीरं स्यात्तत्र कारणशरीरेभिमानवान् ता॰
दात्म्याध्यासेनाहमित्यभिमानवान् जीवः प्राज्ञः प्रज्ञाऽविनाशिस्वरूपा यस्य स प्रज्ञः प्रज्ञ एव प्राज्ञः ए

तन्नामकः स्यादित्यर्थः॥१७॥ क्रमप्राप्तं सूक्ष्मशरीरं तदुपाधिकं जीवं च व्युत्पादयितुं तत्कारणाकाशादि-
सृष्टिमाह तमःप्रधानेति तद्भोगाय तेषां प्राज्ञानां भोगाय सुखदुःखसाक्षात्कारसिद्धये तमःप्रधानप्र-
कृतेस्तमोगुणप्रधानायाः प्रकृतेः पूर्वोक्तायाउपादानकारणभूतायाः सकाशादीश्वराज्ञया ईशनादिश

वियत्पवनतेजोंबुभुवोभूतानि जज्ञिरे १८ शत्वांशैः पंचभिस्तेषां क्रमाद्धींद्रियपंचकं
स्तोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते ॥१९॥ ब

क्रियुक्तस्य जगदधिष्ठातुराज्ञया ईक्षापूर्वक
सर्जनेच्छारूपया निमित्तकारणभूतया वियदादीनि पृथिव्यंतानि पंच भूतानि जज्ञिरे प्रादुर्भूतान्युत्पन्नानी-
त्यर्थः॥१८॥ भूतसृष्टिमभिधाय भौतिकसृष्टिमभिदधान आदौ ज्ञानेंद्रियसृष्टिमाह॥ सत्वांशैरिति तेषां वि-
यदादीनां पंचभिः सत्वांशैः सत्वगुणभागैरुपादानभूतैः श्रोत्रत्वगक्षिरसनघ्राणाख्यधींद्रियपंचकं धींद्रिया

णि ज्ञानेंद्रियाणि तेषां पंचकं क्रमादुपजायते एकैकभूतसत्वांशादेकैकमिंद्रियं जायत इत्यर्थः॥१९॥ सत्वांशा-
नां प्रत्येकमसाधारणकार्याण्यभिधाय सर्वेषां साधारणं कार्यमाह॥ तैरंतःकरणमिति॥ तैः सह सत्वांशैः स-
र्वैः संभूय वर्त्तमानैः अंतःकरणं मनोबुद्ध्युपादानभूतं द्रव्यमुपजायत इत्यनुषंगः॥ तस्यावंतरभेदं सनिमि-
त्तमाह॥ वृत्तीति॥ तदंतःकरणं वृत्तिभेदेन परिणामभेदेन द्विविधा द्विप्रकारं भवति॥ वृत्तिभेदमेव दर्शयति मन

तैरंतःकरणं सर्वैः वृत्तिभेदेन तद्विधा मनो विमर्शरूपं स्याद्बुद्धिः स्यान्निश्चयात्मिका॥२०॥

इति॥ विमर्शरूपं विमर्शः संशयात्मिका वृत्तिः सा स्वरूपं यस्य तत्तथा तन्मनः स्यान्निश्चयात्मिका निश्चयात्मि-
का निश्चयोध्यवसायः स आत्मा स्वरूपं यस्याः सा निश्चयात्मिका सा वृत्तिः बुद्धिः स्यात्॥२०॥ क्रमप्राप्तानां रजो-
शानां प्रत्येकमसाधारणकार्याण्याह रजोंशैरिति तेषां वियदादीनामेव पंचभी रजोंशैः रजोभागैस्तूपादान

भूतैर्वाक्पाणिपादपायूपस्थाभिधानानि एतन्नामकानि कर्मेंद्रियाणि जज्ञिरे॥२१॥ रजोंशानां एव साधार
णं कार्यमाह॥ तैः सर्वैरिति॥ सहितैः संभूय कारणतां गतैः प्राणो जायत इति शेषः तस्यावांतरभेदमाह॥ वृत्ति
भेदादिति॥ स प्राणो वृत्तिभेदात्प्राणनादिव्यापारभेदात्पंचधा पंचप्रकारो भवति॥ वृत्तिभेदानेव दर्शयति॥ प्रा

रजोंशैः पंचभिस्तेषां क्रमात्कर्मेंद्रियाणि तु॥ वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे॥२१॥
तैः सर्वैः सहितैः प्राणो वृत्तिभेदात्स पंचधा॥

ण इति॥ ते पुनस्ते तु भेदाः प्रमाणादिशब्दवाच्या इत्यर्थः॥२२
यदर्थमाकाशादिप्राणांतानां सृष्टिरुक्ता तदिदानीं दर्शयति॥ बुद्धीति॥ बुद्धयो ज्ञानानि कर्माणि व्यापारास्तज्ज
नकानींद्रियाणि बुद्धिकर्मेंद्रियाणि बुद्धींद्रियाणि कर्मेंद्रियाणि चेत्यर्थः बुद्धिकर्मेंद्रियाणि च प्राणाश्च बुद्धिकर्मेंद्रि

यप्राणाः तेषां पंचकानि तैर्मनसा विमर्शात्मकेन धिया निश्चयरूपया बुद्ध्या च सह सप्तदशभिः सप्तदशसंख्या
कैः सूक्ष्मं शरीरं भवति तस्यैव संज्ञांतरमाह॥ तल्लिंगमिति उच्यते वेदांतेष्वित्यर्थः॥२३॥ एवं सूक्ष्मशरीरम
भिधाय तदभिमानत्वप्रयुक्तं प्राज्ञेश्वरयोरवस्थांतरं दर्शयति॥ प्राज्ञ इति॥ प्राज्ञो मलिनसत्वप्रधानाविद्यो

प्राणोपानः समानश्चोदानव्यानौ च ते पुनः॥२२॥ बुद्धिकर्मेंद्रियप्राणपंचकैर्मनसा धिया॥ शरीरं
सप्तदशभिः सूक्ष्मं तल्लिंगमुच्यते॥२३॥ प्राज्ञस्तत्राभिमानेन तैजसत्वं प्रपद्यते॥

पाधिको जीवस्तत्र तेजःशब्दवाच्यांतःकरणोपलक्षितलिंगशरीरेऽभिमानेन तादात्म्याभिमानेन तैजसत्वं तै
जसनामत्वं प्रपद्यते प्राप्नोति॥ ईशः विशुद्धसत्वप्रधानमायोपाधिकः परमेश्वरस्तत्र शरीरेऽहमभिमानेन हि
रण्यगर्भतां हिरण्यगर्भसंज्ञकत्वं प्रपद्यत इत्यनुषंगः॥ तैजसहिरण्यगर्भयोर्लिंगशरीराभिमानित्वे समाने

सतितयोःपरस्परभेदःकिंनिबंधनइत्यादानयोरिति॥तयोस्तैजसहिरण्यगर्भयोःव्यष्टित्वंसमष्टित्वंचभवतिन
नएवभेदइत्यर्थः ईश्वरस्यसमष्टिरूपत्वेजीवानांव्यष्टिरूपत्वेचकारणमादासमष्टिरितिहीश्वरोहिरण्यग
र्भःसर्वेषांलिंगशरीरोपाधिकानांतैजसानांस्वात्मनादात्मचेदनास्वात्मनतादात्म्यैकत्वस्यवेदनान्नता

हिरण्यगर्भतामीशःतयोर्व्यष्टिसमष्टिता॥२७॥समष्टिरीशःसर्वेषांस्वात्मतादात्म्यवेदनात्॥तदना
वात्रतोमेनुरुक्ष्येनेयष्टिमंसमया॥२८॥तज्जोगायपुनर्भोग्यभोगायतनजन्मने॥ ढ॥

नात्समष्टिभवतितनईश्वरादस्मेजीवास्तुतदावातनस्यतादात्म्यवेदनस्यानावात्व्यष्टिमंसमायव्यष्टेर्हेन
रुक्ष्येनेति॥२८॥तेएवंलिंगशरीरंतदुपाधिकौतैजसहिरण्यगर्भौचदर्शयित्वास्थूलशरीरायुत्पत्तिनिमित्तंपर्व

करणंनिरूपयितुमाहतज्जोगायेति॥भगवानैश्वर्यादिगुणषड्संपन्नःपरमेश्वरःपुनःपुनरपितज्जोगायतेषां
जीवानांभोगायैवभोग्यभोगायतनजन्मनेभोग्यस्यान्नपानादेर्भोगायतनस्यनरापुजादिचतुर्विधशरीरजा
तस्यचजन्मनेउत्पत्तयेवियदादिकमाकाशादिभूतपंचकंप्रत्येकमेकैकंपंचीकरोति-अपंचात्मकंपंचात्मकमं

पंचीकरोतिभगवान्प्रत्येकंवियदादिकं॥२९॥द्विधाविधायचैकैकंचतुर्धाप्रथमंपुनः॥स्वेस्वेनरद्वि
तीयांशैर्योजनात्मंचपंचते॥३०॥

पञ्चमानंकरोति॥२९॥अथकथमेकैकस्यपंचात्मकत्वमित्यतआहद्विधेति
वियदादिकमेकैकंद्विधातंचेणीचत्वारितोद्विधाशष्टःविधायचैतावाभागष्टयोपेतंतुचेसमर्थः पुनश्चपुनरपिप्रथ
मंप्रथमंभागंचतुर्धाभागंचतुल्योपेतंविधायेत्यनुषज्यते॥स्वेस्वेनरद्वितीयांशैःस्वस्मात्स्वस्मादितरेषांचतुर्णां
भूतानांयोयोद्वितीयः॥ ढ॥

स्थूलोभागः तेन तेन सह प्रथमभागांशानां चतुर्णां चतुर्णां मध्ये एकैकस्य योजनात्रे विपदादयः प्रत्येकं पंचपंचा
त्मका भवंति॥२७॥ एवं पंचीकरणमभिधाय तैर्भूतैरुत्पाद्यं कार्यवर्गं दर्शयति॥ तैरंड इति तैः पंचीकृतैर्भूतैरु
पादानकारणभूतैरंड उत्पद्यते तत्र ब्रह्मांडांतः भुवनान्युपरिभागे वर्त्तमाना भूम्यादयः सप्तलोका भूमेरधः

तैरंडस्तत्र भुवनं भोग्यभोगाश्रयो भव॥ हिरण्यगर्भः स्थूलेस्मिन् देहे वैश्वानरो भवेत्॥२८॥ ब

स्थितान्यतलादीनि सप्तपातालांतानि तेषु च भुवनेषु तैस्तैः प्राणिभिर्भोक्तुं योग्यान्यन्नादीनि तत्र लोको
चितशरीराणि च तैरेवं पंचीकृतैर्भूतैरीश्वराज्ञया जायंते॥ एवं स्थूलशरीरोत्पत्तिमभिधाय तेषु स्थूलशरी
रेषु अभिमानवतो हिरण्यगर्भस्य समष्टिरूपस्य वैश्वानरसंज्ञकत्वं एकैकस्थूलशरीराभिमानवतां व्य
ष्टितैजसानां विश्वसंज्ञकत्वं च भवतीत्याह॥ हिरण्यगर्भ इति अस्मिन्स्थूले देहे वर्त्तमानो हिरण्यगर्भो वै

श्वानरो भवेत् तत्रैव वर्त्तमानास्तैजसा विश्वा भवंति॥ तेषामवांतरभेदमाह देवेति॥२८॥ इदानीं तेषां विश्वसं
ज्ञां प्राप्तानां जीवानां तत्त्वज्ञानरहितत्वेन संसारापत्तिप्रकारं सदृष्टांतं श्लोकद्वयेनाह॥ ते परागिति ते देवा
दयः परागदर्शिनः बाह्यानेव शब्दादीनेव पश्यंति न तु प्रत्यगात्मानं परांचि खानि व्यतृणत्स्वयंभूस्तस्मात्परा

तैजसा विश्वतां याता देवतीर्यङ्नरादयः॥ ते परागदर्शिनः प्रत्यक्तत्वबोधविवर्जिताः॥२९॥
कुर्वते कर्म्म भोगाय कर्म्म कर्त्तुं च भुंजते॥२९॥ ब ॥

ङ्पश्यति नांतरात्मन्निति श्रुतेः ननु तार्किकादयो देहव्यतिरिक्तमात्मानं जानंतीत्याशंक्येयद्यप्यात्मानं
ते जानंति तथापि श्रुतिसिद्धं तत्त्वं न जानंतीत्याशयेनोक्तमित्याह॥ प्रत्यगिति॥ अत एव भोगाय सुखाद्य
नुभवाय मनुष्यादिशरीराण्यधिष्ठाय कर्म तत्र छरीरोचितानि कर्माणि कुर्वतो जातावेकवचनं पुनश्च क

र्म्मकर्त्रे देवादिशरीरैस्तत्तत्कर्मानुभवेतत्तत्स्मर्तीयेछानुपपत्तातत्तत्साधनानुष्ठानानुपप
त्तेरेवंवर्त्तमानास्तेजीवानदीपवादपतिताःकीराश्चार्त्तादावर्त्तांतरंआशुव्रजंतोयथानिद्रासुखंनज
मंतेएवमाशुजन्मनोजन्मव्रजंतःसुखंनैवलभंतेइति॥३॥एवंसंसारापत्तिमभिधायतन्निदानुपायंदर्श

नयोकीराश्चावर्त्तादावर्त्तांतरमाश्रुवंति॥३॥व्रजंतोजन्मनोजन्मलभंतेनैवनिर्वृतिं॥३॥
सत्कर्म्मपरिपाकोनेकरुणानिधिनोहृता॥३॥ ७ ॥

यितुंदृष्टांतावदाहासत्कर्मेति॥तेकी
राःसत्कर्मपरिपाकात्सर्वोपार्जितपुण्यकर्मपरिपाकात्पाकेनकेनचित्पुरुषविशेषणोहृता॥नदीप्र
वाहादिर्त्रिःसारिताःसंतस्तीरनरुछायांवाप्यसुखंयथालभंतेतथाहृदिआर्म्मंति॥३॥इहजीवो
तमिहपदेशांतरंकेयोनयतिउपदेशमित्येवमुक्तेनप्रकारेणपूर्वोपार्जितपुण्यकर्मपरिपाकवशा १३

देवनत्वदर्शिनःपत्यगमिन्नब्रह्मसाक्षात्कारवतआचार्यादुरोःसकाशादुपदेशंनत्वमस्यादिवाक्यार्थज्ञा
नसाधनंश्रवणंवक्ष्यमाणमवाप्यसंपाद्यपंचकोशविवेकेनान्नादीनांपंचानांकोशानांविवेकेनवक्ष्यमा
णविवेचनेनपरांनिर्वृतिंमोक्षसुखंजंतवोयास्यंतिं॥३॥केतेन्नादयःपंचकोशाइत्याकांक्षायांनानुपदि

यास्यंतीरतरुछायांविश्राम्यंतियथासुखं॥३॥उपदेशमवाप्यैवमाचार्यात्तत्वदर्शिनः॥३॥
पंचकोशविवेकेनजंतवोनिर्वृतिंपरां॥३॥श्रवणंयाणोमनोबुद्धिरानंदश्चेतिपंचते॥३॥

शनि॥श्रवंयाणइति॥श्रवंयाणोमनोबुद्धिरानंदश्चेतेपंचकोशाःबुद्धिर्विज्ञानंतेषामन्नादीनांको
शानांशब्दाभिधेयत्वेकारणमाहतैरिति तैःकोशैराहृतआच्छादितःस्वात्मास्वरूपभूतआत्माविस्मृत्या
स्वस्वरूपविस्मरणेनसं

सृतिं जननादिप्राप्तिरूपं संसारं व्रजेत्॥ स्पष्टं कोशो यथा कोशकारकृमेरावरकत्वेन क्लेशहेतुरेवमन्नादयो
प्यद्वयानंदत्वाद्यावरकत्वेनात्मनः क्लेशहेतुत्वात्कोशादुत्सृज्यंते इत्यर्थः॥३३॥ तेषां कोशानां स्वरूपाणि
क्रमेण व्युत्पादयति॥ स्यात्पंचीकृतेत्यादिना मोदादिवृत्तिभिरित्यंतेन॥ पंचीकृतेभ्यो भूतेभ्य उत्पन्नः स्थूला

कोशास्तैरावृतः स्वात्मा विस्मृत्या संसृतिं व्रजेत्॥३३॥ स्यात्पंचीकृतभूतोत्थो देहस्थूलो
न्नसंज्ञकः॥ लिंगे तु राजसैः प्राणैः प्राणः कर्मेंद्रियैः सह॥३४॥ सात्विकैर्धींद्रियैः साकं

देहोन्नसंज्ञकः अन्नमयशब्दितः कोशः स्यात्प्राणस्तु प्राणमयकोशस्तु लिंगे लिंगशरीरे वर्त्तमानैरा
जसैरजोगुणकार्यभूतैः प्राणैः प्राणापानादिवायुभिः पंचभिर्वागादिभिः कर्मेंद्रियैः सह दशभिः स्या
द्विमर्शात्मा संशयात्मकं पंचभूतसत्वकार्यं यन्मन उक्तं तत्सात्विकः प्रत्येकं भूतसत्वकार्यभूतैर्धींद्रियैः

श्रोत्रादिभिः पंचभिर्ज्ञानेंद्रियैः साकं सहितं मनोमयः कोशः स्यादिति पूर्वेण संबंधः निश्चयात्मिका धीस्तेषा
मेव सत्वकार्यरूपा बुद्धिस्तैरेव पूर्वोक्तैर्ज्ञानेंद्रियैरेव साकं सहिता सती विज्ञानमयः विज्ञानमयाख्यः को

विमर्शात्मा मनोमयः॥३५॥ तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिकाः॥३५॥ कारणे सत्व
मानंदमयो मोदादिवृत्तिभिः॥३६॥ ब ॥

शः स्यात्कारणे कारणभूतायां अविद्यायां यन्मलिनसत्वमस्ति तन्मोदादिवृत्तिभिः प्रियमोदप्रमोदा
ख्यैः इष्टदर्शनलाभभोगजन्यैः सुखविशेषैः सहित आनंदमय आनंदमयाख्यः कोशः स्यादिति॥ न
नु स्थूलशरीरादीनां अन्नमयादिशब्दवाच्यत्वे सवा एष पुरुषोन्नरसमय इत्युपक्रम्य तस्माद्वा एतस्मादन्नर

समयादन्योऽन्तर आत्मा प्राणमयोऽन्योऽन्तर आत्मा मनोमय इत्यादिश्रुतत्वादात्मनोऽन्नमयादिशब्दवाच्यत्वं
कथमुच्यत इत्याशंक्य देहादीनामन्नादिविकारत्वेनान्नमयादिशब्दवाच्यत्वं आत्मनस्तु ते न कोशेन तादात्म्या
भिमानादित्याह॥ तत्तदिति॥ आत्मा प्रत्यगात्मा तत्तत्कोशैस्तेन तेन सह तादात्म्यात्तादात्म्याभिमानात्तत्तन्मय

तत्तत्कोशैस्तु तादात्म्यादात्मा तत्तन्मयो भवेत्॥३६॥ अन्वयव्यतिरेकाभ्यां पंचकोशविवेकतः॥
स्वात्मानं ततउद्धृत्य परं ब्रह्म प्रपद्यते॥३७॥

स्तत्तत्कोशमयः स्याद्व्यवहारकालेऽन्नमयादिकोशप्राधा
न्यादन्नमयादिशब्दवाच्य इत्यर्थः तुशब्द आत्मनः कोशेभ्यो वैलक्षण्यद्योतनार्थः॥३६॥ कथं तर्ह्येवंविधस्यात्म
नो ब्रह्मत्वं भवतीत्याशंक्य कोशेभ्यो विवेचनाद्भवतीत्याह॥ अन्वयेति॥ अन्वयव्यतिरेकाभ्यां वक्ष्यमाणाभ्यां
पंचकोशविवेकतः पंचानां कोशानामन्नमयादीनां विवेकतः प्रत्यगात्मनो विवेचनेन पृथक्करणेन यद्वा पं

चकोशेभ्योऽन्नमयादिभ्यः आत्मनः पृथक्करणेन स्वात्मानं प्रत्यगात्मानं ततस्तेभ्यः कोशेभ्य उद्धृत्य बुद्ध्या नि
ष्कृष्य चिदानंदस्वरूपं निश्चित्य परं ब्रह्म पूर्वोक्तलक्षणं प्रपद्यते प्राप्नोति॥ ब्रह्मैव भवतीत्यर्थः॥३७॥ इदा
नीं विवक्षितान्वयव्यतिरेकौ दर्शयति॥ अभान इति॥ स्वप्ने स्वप्नावस्थायां स्थूलदेहस्यान्नमयकोशस्या

अभाने स्थूलदेहस्य स्वप्ने यद्भानमात्मनः॥३८॥ सोऽन्वयो व्यतिरेकस्तद्भानेऽन्यावभासनं॥३९॥

भानेऽप्रतीतौ सत्यामात्मनः प्रतीचो यद्भानं स्वप्नसाक्षित्वेन यत्स्फुरणमस्ति स आत्मनोऽन्वयस्तस्यामेव
स्वप्नावस्थायां तद्भाने तस्यात्मनः स्फुरणे सति अन्यानवभासनमन्यस्य स्थूलदेहस्यानवभासनमप्रतीतिः
व्यतिरेकः॥

स्थूलदेहस्येतिशेषः अस्मिन्नकारणेऽन्वयव्यतिरेकशालाभ्यां अनुसृत्रितीउच्येते॥३॥ एवंस्थूलदेहस्यानात्मत्वावबोधकान्वयव्यतिरेकौदर्शयित्वालिंगदेहस्यतथात्वावगमकौतौदर्शयतिलिंगेति सुषुप्तौसुषुप्तावस्थायांलिंगभानेलिंगेस्यस्मरस्मशरीरस्याभानेऽप्रतीतौआत्मनोभानेनदवस्तासासिद्धेनस्थू-

लिंगाभानेसुषुप्तौस्यादात्मनोभानमन्वयः॥३॥व्यतिरेकस्तुतज्ज्ञानेलिंगस्याभानसुच्यते॥३॥नहिवेकादिविक्राःस्युःकोशाःप्राणमनोधियः॥४॥तेहितच्चगुणावस्थाभेदमा-

त्रमात्मनोन्वयःस्यादात्मभानेलिंगस्याभानंलिंगदेहस्यव्यतिरेकउच्यते॥३॥ननुपंचकोशविवेचनसुपक्रम्यलिंगदेहविवेचनंप्रस्तुतासंगतमित्याशंक्यप्राणमयादिकोशानितयस्यनचैवंनभीवात्प्रस्तुतासंगतिरित्याह॥ ॥नहिवेकादितिनस्यलिंगशरीरस्यविवेकादिवेचनात्प्राणमनोधियएतन्नामकाःको

शाविविक्राःआत्मनःप्रयत्नाःस्युःकुतइत्यतआहतेहीतिहियस्मात्कारणात्तेप्राणमयादयःनत्वत्रस्थिते लिंगशरीरेगुणावस्थाभेदमात्रात्तद्गुणयोःसत्वरजसोरवस्थाभेदमात्रात्मुख्यप्रधानभावेनावस्थानविशेषादेवप्रयत्नाःभेदेननिर्दिश्यइत्यर्थः॥४॥इदानींमानेदमयकोशत्वेनविवक्षितस्यकारणशरीरस्यवि-

चारप्रस्तुताः॥४॥सुषुप्तमानेभानंतुसमाधावात्मनोन्वयः॥व्यतिरेकस्त्वात्मभानेसुषुप्त
नवभासनं॥४॥

वेचनोपायमाह॥सुषुप्तीतिसमाधौवक्ष्यमाणलक्षणायांसमाध्यवस्थायांसुषुप्तभानेसुषुप्तिशब्दोपलक्षि
तस्यकारणदेहरूपस्याज्ञानस्यावगतौतौआत्मनःतुशब्देवधारणेआत्मनएवभानेस्फुरणंयदस्तिसआ

त्मनोरैक्यं आत्मभावेन आत्मनः स्वरूपैक्यसंसुषुप्तावुपलक्षितस्याज्ञानस्याव्याप्तीतिरेवव्यतिरेकस्तस्येति। अ
त्रायंप्रयोगः यत्तगात्मा यत्रमयादिभ्योभिद्यतेतेषुपरस्परंव्यावर्त्तमानेष्वपिस्वयमव्याहतनानात्वान्वयेषु
व्यावर्त्तमानेषु अपिनव्यावर्त्ततेतत्रेभ्योभिद्यतेयथाकुसुमेभ्यः सूत्रंयथावाखंडादिव्यक्तिभ्योगोत्वमित्यत्र च

यथासुप्तादिषीकैवमात्मापुत्रायासमुद्धृतः॥शारीरत्रितयाद्धीरैः परंब्रह्मैवजायते॥४२॥ ब

यव्यतिरेकाभ्यांकोशपंचकस्याधिविक्रस्यात्मनोब्रह्मप्राप्तिर्भवतीत्युक्तं॥४॥तत्रतिपादिकामंगुष्ठमात्रः पुरु
षोंतरात्मेत्यादिकांतेविद्याकुक्रमस्तमितंनोकउत्क्रमितमर्पतः पवतिप्रयेतिप्रयायेनप्रकारेणमुंजादेत
न्नामकात्तृणविशेषादिषीकागर्भस्थंकोमलतृणंपुत्रायावहिरावरकत्वेनस्थितंनोस्थूलपत्राणांविभज १७

नसक्षणेनोपायेनसमुद्धियतेएवमात्मापिपुत्रायाःन्वयव्यतिरेकेणोपायेनशरीरत्रितयात्सर्वोत्कृष्टशरीरत्रि
तयाद्धीरैःब्रह्मचर्यादिसाधनसंपन्नैरधिकारिभिःसमुद्धृतःएषकृतश्चेत्यसपरंब्रह्मैवजायतेविद्यानंद
रूपत्वस्वजन्यजन्योभयोरविशिष्टत्वादित्यभिप्रायः॥छ॥४२॥एतावतायंग्रंथसंदर्भेणसकलस्यतत्वतात्पर्य

परापरात्मनोरैक्यंपुत्रायासंभावितैकतां॥तत्वमस्यादिवाक्यैःसाभागत्यागेनजायते॥४३॥ व॥

निरूपितत्वादुत्तरग्रंथभागस्यानारंभत्वसंगइत्याशंक्यनदारंभमिष्टेग्रंथानुकीर्त्तनपूर्वकमुत्तरग्रंथस्यता
त्पर्यमाह॥परापरेतिएवंपुत्रेणप्रकारेणपरापरात्मनोस्त्वंपदार्थयोःपरमात्मनीवात्मनोरैकताःभिन्नता
पुत्रायाजन्यजन्यसाम्यप्रदर्शनायुपायेनसंभाविताअंगीकारितासाएकतातत्वमस्यादिवाक्यैःस्वभागत्यागेनवि

ऽंशपरित्यागेन लक्ष्यते लक्षणया वृत्त्या बोध्यते ॥४३॥ तत्त्वमसीति वाक्यार्थज्ञानस्य तदादिपादार्थज्ञानपूर्वकत्वा
त्तत्पदस्य वाच्यार्थं तावदाह ॥ जगत इति ॥ यत्सच्चिदानंदलक्षणं ब्रह्म तामसीं तमोगुणप्रधानां मायामादाय उपा
धित्वेन स्वीकृत्य जगतश्चराचरात्मकस्य कार्यवर्गस्य उपादानमध्यासाधिष्ठानं शुद्धसत्त्वां विशुद्धसत्त्वप्रधानां ता

जगतो यदुपादानं मायामादाय तामसीं ॥४४॥ निमित्तं शुद्धसत्त्वां तामुच्यते ब्रह्म तद्गिरा ॥४४॥ यदा म
लिनसत्त्वां तां कामकर्मादिदूषितां ॥४५॥

मुपाधित्वेन स्वीकृत्य निमित्तमुपादानाद्यभिज्ञं कर्तृ भवति तद्ब्रह्म नि
मित्तोपादानोभयरूपं ब्रह्म तद्गिरा तत्त्वमसि वाक्यस्थेन तत्पदेनोच्यते ॥४४॥ त्वंपदवाच्यार्थमाह ॥ यदेति ॥ तदेव ब्रह्म
यदा यस्यामवस्थायां मलिनसत्त्वां ईषद्रजस्तमोमिश्रणेन मलिनसत्त्वप्रधानां अत एव कामकर्मादिदूषितां

तामविद्याशब्दवाच्यां मायामादत्ते उपाधित्वेन स्वीकरोति तदत्त्वंपदेनोच्यते ॥ एवं तत्त्वंपदार्थावभिधाय वा
क्यार्थमाह ॥ त्रितयीमिति ॥ त्रितयीमपि त्रिप्रकारामपि तमःप्रधानविशुद्धसत्त्वप्रधानमलिनसत्त्वप्रधानत्व
भेदेनोक्तामत एव परस्परविरोधिनीं तां मायां मुक्त्वा परित्यज्य अखंडभेदरहितं सच्चिदानंदं ब्रह्म महावाक्येन ल

आहुस्ते तत्परं ब्रह्म त्वंपदेन तदोच्यते ॥ त्रितयीमपि तां मुक्त्वा परस्परविरोधिनीं ॥४६॥ अखंडं सच्चिदानंदं महावाक्येन लक्ष्यते ॥
सोयमित्यादिवाक्येषु विरोधात्तदिदंतयोः ॥४७॥ त्यागेन भागयोरेक आश्रयो लक्ष्यते यथा ॥

क्ष्यते ॥ उक्तं ॥४५॥४६॥ नन्वेवं लक्षणावृत्त्या वाक्यार्थबोधनं क्व दृष्टमित्याशंक्याह ॥ सोयमिति ॥ सोयं देवदत्त इत्यादिवाक्ये
षु तदिदंतयोस्तदेतद्देशकालवैशिष्ट्यलक्षणयोर्धर्मयोर्विरोधादैक्यानुपपत्तेर्भागयोर्विरुद्धांशयोस्त्यागेनैक आश्रयो देवदत्तस्य

रूपमेकमेवयथालक्ष्यते।एवंदृष्टांतमाधोनियदार्ष्टांतिकमाह।मायाविद्येइति॥एवंसोयंदेवदत्तइत्यादिवा
क्येयथातद्वत्स्वरजीवयोरुपाधीउपाधिभूतेमायाःविद्यापूर्वोक्तेविहायाखंडंभेदरहितंसच्चिदानंदंपरब्रह्मैव
महावाक्येनलक्ष्यते॥ननुमहावाक्येकेनलक्ष्यंसविकल्पमुतनिर्विकल्पइतिविकल्पप्रथमपक्षेदोषमाहपूर्ववादी

मायाविद्येविहायैवमुपाधीपरजीवयोः॥४८॥अखंडंसच्चिदानंदंपरंब्रह्मैवलक्ष्यते॥स
विकल्पस्यलक्ष्यत्वेलक्ष्यस्यस्यादवस्तुता॥४९॥ ॥श्री॥ ॥

॥सविकल्पस्येतिसविकल्पस्यविकल्पेनविपरितत्वेनकल्पितेननामजात्यादिरूपेणसहवर्तनदृतिसविकल्पेन
स्यलक्ष्यत्वेवाक्येनबोध्यत्वेलक्ष्यस्यवाक्यार्थतयालक्ष्यस्याःवस्तुतास्यान्मिथ्यात्वंस्यात्॥४७॥४८॥४९॥ १९

द्वितीयेदोषमाह॥निर्विकल्पस्येति॥निर्विकल्पस्यनामजात्यादिभारहितस्यलक्ष्यत्वेनदृष्टंसो
केनक्वापिदृष्टेनचसंनविउपपद्यमानमपिनभवतिलक्ष्यत्वधर्मवतोनिर्विकल्पत्वव्याघातादितियाव

निर्विकल्पस्यलक्ष्यत्वेनदृष्टेनचसंनवि।विकल्पोनिर्विकल्पस्यसविकल्पस्यवाभवेत्॥५०॥

तत्सिद्धांतिजात्युत्तरत्वान्नेदंचोद्यमितिनिर्विकल्पपूर्वकंदोषमाह।विकल्पइति॥सविकल्पस्यवानि
र्विकल्पस्यवालक्ष्यत्वमिनियोविकल्पस्त्वयाकुतःसकिंनिर्विकल्पस्यउतसविकल्पस्यभवेत्॥५०॥

आद्ये प्रथमे पक्षे व्याहतिस्त्वयोक्तो व्याघात एव अत्यन्तद्वितीये पक्षेऽनवस्थादयः तथाहि स विकल्पस्य विकल्प इत्यत्र वि
कल्पेन सह वर्त्तत इत्यत्र तृतीयांतविकल्पपदेन प्रथमांतविकल्पपदेन चैक एव विकल्पोभिधीयते द्वौ वा एक एव चेत्स्वयमेक एव विकल्पाश्र
यविशेषणतयात्माऽश्रयस्तदाश्रितो विकल्पश्चेत्तदात्माश्रयता द्वौ चेत्तदा तृतीयांतशब्दनिर्द्दिष्टस्यापि विकल्पस्य विकल्परूपत्वात्तदाश्रयस्या

आद्ये व्याहतिरन्यत्राऽनवस्थात्माश्रयादयः॥

पि स विकल्पत्वात्तद्विशेषणभूतो विकल्पः किं प्रथमांतशब्दनिर्द्दिष्ट एव विककल्प उताभ्यामन्यः॥ आद्ये अन्योन्याश्रयता द्वितीयेपि धर्मि
विशेषणीभूतो विकल्पः किं प्रथमांतशब्दनिर्द्दिष्ट उत तेभ्योऽन्य आद्ये चक्रकापत्तिर्द्वितीये तस्याप्यन्यस्तस्याप्यन्य इत्यनवस्थापात इति

न केवलमत्रैवेदं दूषणमपि तु सर्वत्रैवंविधविकल्पपूर्वकं दूषणं प्रसरतीत्याह॥ इदमिति॥ इदं विकल्पदूष
णजातं गुणक्रियाजातिद्रव्यसंबंधवस्तुषु गुणादिसंबंधांतेषु पंचसु वस्तुषु समं तथाहि॥ गुणः किं निर्गुणे वर्त्तते ऽथ
वा गुणवति क्रियापि क्रियारहिते वर्त्तते क्रियावति वा आद्ये व्याघातता ऽन्यत्रान्माश्रयादय इति सर्वत्र चैवमुह्यं॥५१

इदं गुणक्रियाजातिद्रव्यसंबंधवस्तुषु॥५१॥ समं तेन स्वरूपस्य सर्वमेतदितीष्यतां॥

नन्विदमसदुत्तरं चेत्किं सदुत्तरमित्याशंक्याह॥ तेनेति॥ तेनैवं विकल्पस्यासंगतत्वेनैतद्गुणादिकं सर्वं
स्वरूपस्येति इष्यतां गुणादयः सर्वे वस्तुस्वरूपे वर्त्तन इत्यभिप्रायः भवत्वेवमन्यत्र प्रकृते किमायातमि

त्यतआह॥विकल्पेति॥विकल्पतदभावाभ्यांविकल्पेनविकल्पाभावेनवासंस्पृष्टार्थवस्तुनिसंस्पर्शरहितेपरमात्मव
स्तुनिविकल्पितत्वलक्ष्यत्वसंबंधाद्यास्तत्रविकल्पितत्वंनामसविकल्पस्यवानिर्विकल्पस्यवेतिपूर्वोक्तेनविषयीकृतत्वंलक्ष्य
त्वंलक्षणावृत्त्याज्ञाप्यत्वंसंबंधःसंयोगादिरादिशब्देनद्रव्यादयोगृह्यतेतुशब्दोवधारणेतत्रद्रव्यंनामगुणानामाश्रयोद्रव्यं

विकल्पतदभावाभ्यामसंस्पृष्टार्थवस्तुनि॥५२॥विकल्पितत्वलक्ष्यत्वसंबंधाद्यास्तुकल्पिताः॥
इत्थंवाक्यैस्तदर्थानुसंधानंश्रवणंभवेत्॥५३॥

समवायिकारणंद्रव्यमितिवातार्किकैर्लक्षितंकर्मव्यतिरिक्तत्वेसतिजातिमात्राश्रयोगुणःनित्यमेकमनेकवृत्तिसामान्यमितिल
क्षिताजातिःसंयोगवियोगयोरसमवायिकारणजातीयंकर्मेतिलक्षिताक्रियाएतेसर्वेस्वरूपेकल्पिताएवेत्यर्थः॥एतावताग्रं
थसंदर्भेणकिमुक्तंभवतीत्याकांक्षायांफलितमाह॥इत्थमितिइत्थंजगतोयदुपादानमित्यादिग्रंथजातोक्तप्रकारेणवाक्यैस्तत्व
मस्यादिवाक्यैस्तदर्थानुसंधानंतेषांवाक्यानामर्थस्यजीवब्रह्मणोरेकत्वलक्षणस्यानुसंधानंश्रवणंभवेत्

युक्त्याशब्दस्पर्शादयोवेद्याइत्यादिनापरापरात्मनोरेवंयुक्त्यासंभावितैकतेत्यंतेनग्रंथसंदर्भेणोक्तप्रकारयासंभावितत्वा
नुसंधानंश्रुतस्यार्थस्योपपद्यमानत्वज्ञानंयदस्तितत्तुमननमित्युच्यते॥इदानींनिदिध्यासनमाह॥ताभ्यामिति॥ताभ्यांश्रवणमन
नाभ्यांनिर्विचिकित्सेर्थेनिर्गताविचिकित्सासंशयोयस्मादसौनिर्विचिकित्सःतस्मिन्नर्थेविषयेस्थापितस्यधारणावतश्चेतसःदेशसंबं

युक्त्यासंभावितत्वानुसंधानंमननंचतत्॥ताभ्यांनिर्विचिकित्सेर्थेचेतसःस्थापितस्यतत्॥५४॥एकतानत्वमेतद्धिनिदिध्यास
नमुच्यते॥ध्यातृध्यानेपरित्यज्यक्रमाद्ध्येयैकगोचरं॥५५॥

धश्चित्तस्यधारणेतिपतंजलिनोक्तत्वात्यदेकतानत्वमेकाकारवृत्तिप्रवाहवत्त्वमेतन्निदिध्यासनमुच्यतेहिप्रसिद्धंयोगशास्त्रेतत्रप्रत्य
येकतानताध्यानमिति॥तस्यैवनिदिध्यासनस्यपरिपाकदृशारूपंसमाधिमाह॥ध्यातृध्यानेइति॥निदिध्यासनेतावद्ध्याताध्यानंध्येयंचेतित्रि
यंभासतेतत्रयदाचित्तमभ्यासवशेनध्यातृध्यानेध्यातारंध्यानंचक्रमात्परित्यज्यध्येयैकगोचरंध्येयमेकमेवगोचरोविषयोयस्यतत्तथाविधं
॥भवतितदासमाधिरित्युच्यते॥५५॥

२२ तत्रदृष्टांतः॥निवातेति॥वायुरहितेप्रदेशेवर्त्तमानोदीपोयथानिश्चलोभवतितद्वदित्यर्थः॥ननुसमा
धौवृत्तीनामनुपलब्धौध्येयैकगोचरत्वमपिनिश्चेतुंनशक्यतइत्याशंक्यतइत्याशंक्यवृत्तिसद्भावस्यानुमा
नगम्यत्वान्नैवमित्याह॥वृत्तयस्त्विति॥आत्मगोचराआत्मागोचरोविषयोयासांतावृत्तयस्तुतदानींसमाधि

निवातदीपवच्चित्तंसमाधिरभिधीयते।वृत्तयस्तुतदानीमज्ञा
ताअप्यात्मगोचराः॥स्मरणादनुमीयंतेव्युत्थितस्यसमुत्थितात्॥५६॥

कालेऽज्ञाताअपिव्युत्थितस्यसमाधेरुत्थितस्यसमुत्थितस्यसमुत्थितादुत्पन्नात्स्मरणादेतावंतंकालंसंमांहितो
ऽभूवमित्येवंरूपादनुमीयंतेयद्यत्स्मर्यतेतत्तदनुभूतमितिव्याप्तेलोकसिद्धत्वादित्यर्थः॥५६॥ ॥ २२

ननुतदानींवृत्त्युत्पादकप्रयत्नाभावात्कथंवृत्त्यनुवृत्तिरित्याशंक्यतात्कालिकप्रयत्नाभावेपिप्राथमिकादे
वप्रयत्नाददृष्टादिसहकारिसहिताद्भवतीत्याह॥वृत्तीनामिति॥ध्येयैकगोचराणांवृत्तीनामनुवृत्तिस्तुप्रवाहरूपे
णानुगतिस्तुप्रथमादपिप्रयत्नात्समाधिपूर्वकालीनादपिअदृष्टमशुक्लकर्माख्योयःपुण्यविशेषःकर्माशुक्लकृ

वृत्तीनामनुवृत्तिस्तुप्रयत्नात्प्रथमादपि।अदृष्टासकृदभ्याससंस्कारसचिवाद्भवेत्॥५७॥

दंप्रयोगिनस्त्रिविधमितरेषामितिपतंजलिनासूत्रितत्वात्यश्चासकृदभ्याससंस्कारःपुनःपुनःसमाध्यभ्या
सेनजनितोभावनाख्यःसंस्कारविशेषस्ताभ्यांसहकारिकारणाभ्यांसहवर्त्तमानाद्भवति॥५७॥नन्वयं
समाधिःपूर्वाचार्यैर्ननिरूपितोदृष्टइत्याशंक्यसर्वगुरुणाश्रीपुरुषोत्तमेननिरूपितत्वान्नैवमित्याह॥ ॥

यथेति॥यथादीपोनिवातस्थोनिंगतेसोपमास्मृतेत्यादिभिः॥श्लो॰केरनेकधानानाप्रकारेणभगवान्ज्ञानै
श्वर्यादिसंपन्नइममेवनिर्विकल्पकसमाधिरूपमर्थमर्जुनायन्यरूपायन्निरूपितवान्॥५८॥अत्यसमा
धेरवांतरफलमाह॥अनादाविति॥अनादौस्मिंइहास्मिन्संसारेसंचिताःसंपादिताःकर्मकोट्यःकर्मणांपु॰

यथादीपोनिवातस्थइत्यादिभिरनेकधाभगवानिममेवार्थमर्जुनायन्यरूपयन्५८॥

अनादाविहसंसारेसंचिताःकर्मकोटयः॥~~वर्षत्येषयतोधर्ममृतधाराःसहस्रशः॥५९॥~~
अनेनविलयंयांतिसद्योधर्मोविजृंभते॥

ण्यपुण्यलक्षणानांकोटयइत्कलेपेक्षणंअपरिमितानिकर्माणीत्यर्थः॥अनेनसमाधिनाविलयंयांतिविनश्यंतिनिश्शेषंयांतिचास्यकर्माणि।
ज्ञानाग्निःसर्वकर्माणीतिश्रुतेस्मृतेश्चसद्योधर्मःस्वविलासाविद्यानिवर्तकसाक्षात्कारसाधनभूतोधर्मोविजृंभतेस्पष्टं॥५९॥तत्रकिंप्रमाण २७

मित्यतआह॥धर्मेति॥योगविन्नमाः॥अतिशयेनयोगज्ञाब्रह्मसाक्षात्कारबंधनइतियावत्इमंनिर्विकल्पसमाधिधर्ममेद्यंप्राहुः
स्पष्टं॥तदुपपादयतिवर्षतीति॥यतःकारणादेषसमाधिर्धर्मामृतधाराःधर्मलक्षणाअमृतधारासहस्रशोवर्षतिलक्षणमेकंकृत्व

धर्ममेद्यमिमंप्राहुःसमाधियोगविन्नमाः॥वर्षत्येषयतोधर्मामृतधाराःसहस्रशः॥६०॥
अमुनाबासनाजालंनिःशेषंप्रविलापिते॥समूलोन्मूलितेपुण्यपापाख्येकर्मसंचये॥६१॥

ज्ञातस्यापीतिश्रुतेरतोधर्मवेद्यंप्राहुरितिपूर्वेणान्वयः॥६०॥इदानींसमाधेःपरमंप्रयोजनमाह॥अमुनेति॥अमुनासमाधि
नाबासनाजालेअहंकारममकारकर्तृत्वाद्यभिमानहेतुभूतेज्ञानविरुद्धेसंस्कारसमूहेनिःशेषंयथाभवतितथाप्रविलापितेविनाशि
तेपुण्यपापाख्येकर्मसंचयेसमूलोन्मूलितेमूलसहितंयथाभवतितथोन्मूलितेसतिकृतेविनाशितेइतियावत्॥६१॥फ

लितमाह॥ वाक्यमिति॥ वाक्यंतत्त्वमस्यादिवाक्यंअप्रतिबद्धंसत्कर्मवासनान्यांप्रतिबंधरहितंसत्अपरोक्षावभासितेपूर्वंपरो
क्षतयाप्रकाशितेतत्रैकरामलकवत्करस्थितंमलकगोचरमिवापरोक्षमपरोक्षतयातत्त्वावभासनसमर्थंबोधंज्ञानंप्रसूयतेजनयति
६२॥ इदानींपरोक्षज्ञानस्यफलमाह॥ परोक्षमिति॥ देशिकपूर्वकंगुरुमुखात्श्रुत्याशब्दंतत्त्वमस्यादागमजन्यंपरोक्षंब्रह्मविज्ञानंबुद्धिपूर्वकं

वाक्यमप्रतिबद्धंसत्प्राक्परोक्षावभासते॥ करामलकवद्बोधमपरोक्षंप्रसूयते॥६२॥ परोक्षंब्रह्मविज्ञानंशास्त्रंदेशिक
पूर्वकं॥ बुद्धिपूर्वकृतंपापंकृत्संदहतिवह्निवत्॥६३॥ अपरोक्षात्मविज्ञानंशास्त्रंदेशिकपूर्वकं॥ संसारकारणाज्ञानतमस
श्रीडभास्करः॥६४॥

तंज्ञानपूर्वकंयथाभवतितथाकृतंकर्मसमस्तंपापंबह्निवद्दहति॥६३॥ अपरोक्षज्ञानफलमाह॥ अपरोक्षेति॥ शास्त्रंदेशिकपूर्वकंव्याख्या
तंअपरोक्षात्मविज्ञानमपरोक्षस्यात्मनोविज्ञानंसंशयविपर्ययरहितंयतज्ञानंतत्संसारकारणाज्ञानतमसः संसारकारणंयदज्ञानमस्ति
देवतमस्तस्यचंडभास्करः॥ मध्याह्नकालीनसूर्यः॥ बाह्यतमश्चंडभास्करइवाज्ञानतमसोनिवर्त्तकमित्यर्थः॥६४॥ २४

ग्रंथान्यासफलमाह॥ इत्थमिति॥ नरइत्थमुक्तप्रकारेणतत्त्वविवेकंतत्त्वस्यांब्रह्मात्मैकत्वलक्षणस्यविवे
कःकोशपंचकादिवेचनंविधायकृत्वातस्मिंस्तत्त्वेविधिवच्छास्त्रोक्तप्रकारेणमनःसमाधायस्थिरीकृत्यवि

इत्थंतत्त्वविवेकंविधायविधिवन्मनःसमाधाय॥
विगलितसंसृतिबंधःप्राप्नोतिपरंपदंनरोनचिरात्॥६५॥

गलितसंसृतिबंधोःपरोक्षज्ञानेननिवृत्तसंसारबंधःसन्परंपदंनिरतिशयानंदरूपंमोक्षंनचिराद्विलंबेन
प्राप्नोतिसत्यज्ञानानंदलक्षणंब्रह्मैवभवतीत्यर्थः॥६५॥ ॥इतीश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्
भारतीतीर्थविद्यारण्यमुनिकिंकरेणविरचितातत्त्वविवेकःसमाप्तः॥ ॥ ॥श्रीहाटकेश्वरप्रसन्नोस्तु॥ ॥

॥२९॥

॥२५॥